# Shlokas to be Recited during Study of Shrimad Ramayanam

# શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ માધ્વ

## Document Information

Text title : Shlokas to be Recited (mAdhva sampradAya) during Study of Shrimad Ramayanam

File name : rAmAyaNapaThanopakramopasaMhArakramaHmAdhva.itx

Category : raama, dhyAnam, mangala

Location : doc_raama

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan

Latest update : January 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2023

*sanskritdocuments.org*

# શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ માધ્વ

॥ શ્રીઃ ॥

## ધ્યાનમઙ્ગલશ્લોકાઃ ।

(Dhyana Shloka to be recited before the commencement of Parayanam)

॥ માધ્વસમ્પ્રદાયઃ ॥

માધ્વાનાં શ્રીમદ્રામાયણપઠનોપક્રમે અનુસન્ધેયાઃ ધ્યાનશ્લોકાઃ

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપ શાન્તયે ॥ ૧॥

લક્ષ્મીનારાયણં વન્દે તદ્ભક્તપ્રવરો હિ યઃ ।
શ્રીમદાનન્દતીર્થાખ્યો ગુરુસ્તં ચ નમામ્યહમ્ ॥ ૨॥

વેદે રામાયણે ચૈવ પુરાણે ભારતે તથા ।
આદાવન્તે ચ મધ્યે ચ વિષ્ણુઃ સર્વત્ર ગીયતે ॥ ૩॥

સર્વવિઘ્નપ્રણેમનં સર્વસિદ્ધિકરં પરમ્ ।
સર્વજીવપ્રણેતારં વન્દે વિજયદં હરિમ્ ॥ ૪॥

સર્વાભીષ્ટપ્રદં રામં સર્વારિષ્ટનિવારકમ્ ।
જાનકીજાનિમનિશં વન્દે મદ્ગુરુવન્દિતમ્ ॥ ૫॥

અભ્રમં ભઙ્ગરહિતમજડં વિમલં સદા ।
આનન્દતીર્થમતુલં ભજે તાપત્રયાપહમ્ ॥ ૬॥

ભવતિ યદનુભાવાદેડમૂકોઽપિ વાગ્મી
જડમતિરપિ જન્તુર્જાયતે પ્રાજ્ઞમૌલિઃ ।
સકલવચનચેતોદેવતા ભારતી સા
મમ વચસિ નિધત્તાં સન્નિધિં માનસે ચ ॥ ૭॥

મિથ્યાસિદ્ધાન્તદુર્ધ્વાન્તવિધ્વંસનવિચક્ષણઃ ।
જયતીર્થાખ્યતરણિર્ભાસતાં નો હૃદમ્બરે ॥ ૮॥

ચિત્રૈઃ પદૈશ્ચ ગમ્ભીરૈર્વાક્યૈર્માનૈરખણ્ડિતૈઃ ।
ગુરુભાવં વ્યઞ્જયન્તી ભાતિ શ્રીજયતીર્થવાક્ ॥ ૯॥

કૂજન્તં રામ રામેતિ મધુરં મધુરાક્ષરમ્ ।
આરુહ્ય કવિતાશાખાં વન્દે વાલ્મીકિકોકિલમ્ ॥ ૧૦॥

વાલ્મીકેર્મુનિસિંહસ્ય કવિતાવનચારિણઃ ।
શ ृણ્વન્ રામકથાનાદં કો ન યાતિ પરાં ગતિમ્ ॥ ૧૧॥

યઃ પિબન્ સતતં રામચરિતામૃતસાગરમ્ ।
અતૃપ્તસ્તં મુનિં વન્દે પ્રાચેતસમકલ્મષમ્ ॥ ૧૨॥

ગોષ્પદીકૃતવારાશિં મશકીકૃતરાક્ષસમ્ ।
રામાયણમહામાલારત્નં વન્દેઽનિલાત્મજમ્ ॥ ૧૩॥

અઞ્જનાનન્દનં વીરં જાનકીશોકનાશનમ્ ।
કપીશમક્ષહન્તારં વન્દે લઙ્કાભયઙ્કરમ્ ॥ ૧૪॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥ ૧૫॥

ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં યઃ શોકવહ્નિં જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ૧૬॥

આઞ્જનેયમતિપાટલાનનં કાઞ્ચનાદ્રિકમનીયવિગ્રહમ્ ।
પારિજાતતરુમૂલવાસિનં ભાવયામિ પવમાનનન્દનમ્ ॥ ૧૭॥

યત્ર યત્ર રઘુનાથ કીર્તનં તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
બાષ્પવારિપરિપૂર્ણલોચનં મારુતિં નમત રાક્ષસાન્તકમ્ ॥ ૧૮॥

વેદવેદ્યે પરે પુંસિ જાતે દશરથાત્મજે ।
વેદઃ પ્રાચેતસાદાસીત્ સાક્ષાદ્રામાયણાત્મના ॥ ૧૯॥

આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ ।
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૨૦॥

તદુપગતસમાસસન્ધિયોગં સમમધુરોપનતાર્થવાક્યબદ્ધમ્ ।

રઘુવરચરિતં મુનિપ્રણીતં દશશિરસશ્ચ વધં નિશામયધ્વમ્ ॥ ૨૧॥

વૈદેહી સહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
    મધ્યેપુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
    વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૨૨॥

વન્દે વન્દ્યં વિધિભવમહેન્દ્રાદિવૃન્દારકેન્દ્રૈઃ
    વ્યક્તં વ્યાપ્તં સ્વગુણગણતો દેશતઃ કાલતશ્ચ ।
ધૂતાવદ્યં સુખચિતિમયૈર્મઙ્ગલૈર્યુક્તમઙ્ગૈઃ
    સાનાથ્યં નો વિદધદધિકં બ્રહ્મ નારાયણાખ્યમ્ ॥ ૨૩॥

ભૂષારત્નં ભુવનવલયસ્યાખિલાશ્ચર્યરત્નં
    લીલારત્નં જલધિદુહિતુર્દેવતામૌલિરત્નમ્ ।
ચિન્તારત્નં જગતિ ભજતાં સત્સરોજદ્યુરત્નં
    કૌસલ્યાયા લસતુ મમ હૃન્મણ્ડલે પુત્રરત્નમ્ ॥ ૨૪॥

મહાવ્યાકરણામ્ભોધિમન્થમાનસમન્દરમ્ ।
કવયન્તં રામકીર્ત્યા હનુમન્તમુપાસ્મહે ॥ ૨૫॥

મુખ્યપ્રાણાય ભીમાય નમો યસ્ય ભુજાન્તરમ્ ।
નાનાવીરસુવર્ણાનાં નિકષાશ્માયિતં બભૌ ॥ ૨૬॥

સ્વાન્તસ્થાનન્તશય્યાય પૂર્ણજ્ઞાનમહાર્ણવે ।
ઉત્તુઙ્ગવાક્તરઙ્ગાય મધ્વદુગ્ધાબ્ધયે નમઃ ॥ ૨૭॥

વાલ્મીકેર્ગૌઃ પુનીયાન્નો મહીધરપદાશ્રયા ।
યદ્દુગ્ધમુપજીવન્તિ કવયસ્તર્ણકા ઇવ ॥ ૨૮॥

સૂક્તિરત્નાકરે રમ્યે મૂલરામાયણાર્ણવે ।
વિહરન્તો મહીયાંસઃ પ્રીયન્તાં ગુરવો મમ ॥ ૨૯॥

હયગ્રીવ હયગ્રીવ હયગ્રીવેતિ યો વદેત્ ।
તસ્ય નિઃસરતે વાણી જહ્નુકન્યાપ્રવાહવત્ ॥ ૩૦॥

॥ ઇતિ શ્રીમદ્રામાયણપઠનોપક્રમે અનુસન્ધેયાઃ શ્લોકાઃ સમાપ્તાઃ ॥

## શ્રીમદ્રામાયણપારાયણસમાપનક્રમઃ

॥ શ્રીમદ્રામાયણપારાયણસમાપને અનુસન્ધેયાઃ મઙ્ગલશ્લોકાઃ ॥

સ્વસ્તિ પ્રજાભ્યઃ પરિપાલયન્તાં
    ન્યાય્યેન માર્ગેણ મહીં મહીશાઃ ।
ગોબ્રાહ્મણેભ્યઃ શુભમસ્તુ નિત્યં
    લોકાઃ સમસ્તાઃ સુખિનો ભવન્તુ ॥ ૧॥

કાલે વર્ષતુ પર્જન્યઃ પૃથિવી સસ્યશાલિની ।
દેશોઽયં ક્ષોભરહિતો બ્રાહ્મણાઃ સન્તુ નિર્ભયાઃ ॥ ૨॥

લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાભવઃ ।
યેષામિન્દીવરશ્યામો હૃદયે સુપ્રતિષ્ઠિતઃ ॥ ૩॥

મઙ્ગલં કોસલેન્દ્રાય મહનીયગુણાબ્ધયે ।
ચક્રવર્તિતનૂજાય સાર્વભૌમાય મઙ્ગલમ્ ॥ ૪॥

વેદવેદાન્તવેદ્યાય મેઘશ્યામલમૂર્તયે ।
પુંસાં મોહનરૂપાય પુણ્યશ્લોકાય મઙ્ગલમ્ ॥ ૫॥

વિશ્વામિત્રાન્તરઙ્ગાય મિથિલાનગરીપતેઃ ।
ભાગ્યાનાં પરિપાકાય ભવ્યરૂપાય મઙ્ગલમ્ ॥ ૬॥

પિતૃભક્તાય સતતં ભ્રાતૃભિઃ સહ સીતયા ।
નન્દિતાખિલલોકાય રામભદ્રાય મઙ્ગલમ્ ॥ ૭॥

ત્યક્તસાકેતવાસાય ચિત્રકૂટવિહારિણે ।
સેવ્યાય સર્વયમિનાં ધીરોદારાય મઙ્ગલમ્ ॥ ૮॥

સૌમિત્રિણા ચ જાનક્યા ચાપબાણાસિધારિણે ।
સંસેવ્યાય સદા ભક્ત્યા સ્વામિને મમ મઙ્ગલમ્ ॥ ૯॥

દણ્ડકારણ્યવાસાય ખણ્ડિતામરશત્રવે ।
ગૃધ્રરાજાય ભક્તાય મુક્તિદાયાસ્તુ મઙ્ગલમ્ ॥ ૧૦॥

સાદરં શબરીદત્તફલમૂલાભિલાષિણે ।
સૌલભ્યપરિપૂર્ણાય સત્ત્વોદ્રિક્તાય મઙ્ગલમ્ ॥ ૧૧॥

હનુમત્સમવેતાય હરીશાભીષ્ટદાયિને ।
વાલિપ્રમથનાયાસ્તુ મહાધીરાય મઙ્ગલમ્ ॥ ૧૨॥

શ્રીમતે રઘુવીરાય સેતૂલ્લઙ્ઘિતસિન્ધવે ।
જિતરાક્ષસરાજાય રણધીરાય મઙ્ગલમ્ ॥ ૧૩॥

આસાદ્ય નગરીં દિવ્યાં અભિષિક્તાય સીતયા ।
રાજાધિરાજરાજાય રામભદ્રાય મઙ્ગલમ્ ॥ ૧૪॥

મઙ્ગલાશાસનપરૈઃ મદાચાર્યપુરોગમૈઃ ।
સર્વૈશ્ચ પૂર્વૈરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૫॥

ઇતિ શ્રીમદ્રામાયણપારાયણસમાપને અનુસન્ધેયાઃ મઙ્ગલશ્લોકાઃ સમાપ્તાઃ ॥

Encoded and proofread by Aruna Narayanan narayanan.aruna at gmail.com

---

*Shlokas to be Recited during Study of Shrimad Ramayanam*

pdf was typeset on January 22, 2023

Please send corrections to *sanskrit@cheerful.com*